# Mainakaprati Himavanproktam Shivarchanopadesham

# મૈનાકપ્રતિ હિમવાન્પ્રોક્તં શિવાર્ચનોપદેશમ્

## Document Information

Text title : Mainakaprati Himavanproktam Shivarchanopadesham

File name : mainAkapratihimavAnproktaMshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | vAvRittashlokAH||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# મૈનાકપ્રતિ હિમવાન્પ્રોક્તં શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

હિમવાનુવાચ

વયં શિવૈકશરણાસ્તતોઽસ્માકં સદાશિવઃ ।
શુભપ્રદઃ શુભાકારો દાસ્યત્યેવ શુભાનિ નઃ ॥ ૨૯૯॥

શરણં યાન્તિ યે નિત્યં મહાદેવમુમાપતિમ્ ।
દુઃખાનિ ન ભવિષ્યન્તિ તેષાં સ્વપ્નેઽપિ સર્વથા ॥ ૩૦૧॥

તાવદેવ હિ દુઃખાનિ વિવિધાનિ શરીરિણામ્ ।
યાવન્નારાધ્યતે ભક્ત્યા ભગવાનમ્બિકાપતિઃ ॥ ૩૦૨॥

પૂજયિત્વાપિ ગૌરીશં યદિ દુઃખમવાપ્યતે ।
વેદાઃ પ્રમાણમિતિ ધીઃ પ્રમારૂપા કથં ભવેત્ ॥ ૩૦૩॥

અસ્તાદ્રેર્યદ્યુદેત્યર્કસ્તદાપિ શિવપૂજકઃ ।
ન પ્રાપ્નોત્યેવ દુઃખાનિ સ્વપ્નેઽપીતિ મતિર્મમ ॥ ૩૦૪॥

લોકે શિવાર્ચનાદન્યન્નાસ્તિ શોકવિનાશકમ્ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૩૦૫॥

સર્વં પાપકૃતઃ પાપં વિનશ્યતિ શિવાર્ચનાત્ ।
નષ્ટે પાપે કુતઃ શોકઃ નાનાપાતકહેતુકઃ ॥ ૩૦૬॥

ન ભવિષ્યતિ વિશ્વાસો યેષામીશ્વરપૂજને ।
તેષાં બહૂનિ પાપાનિ ભવિષ્યન્તિ ન સંશયઃ ॥ ૩૦૭॥

યેષામીશ્વરપૂજાયાં વિશ્વાસઃ સતતં ભવેત્ ।
સદા તેષાં ભવિષ્યન્તિ શોભનાનિ સુખાનિ ચ ॥ ૩૦૮॥

અત એવ મહાદેવં સર્વલોકમહેશ્વરમ્ ।
પૂજયન્ત્યતિયત્નેન મુનયો દુઃખનાશકમ્ ॥ ૩૦૯॥

હૃદિ ક્ષણં ક્ષણાર્ધં વા ધ્યાયેદ્યઃ પાર્વતીપતિમ્ ।
સ નાપ્નોત્યેવ દુઃખાનિ કદ્વાચિદપિ સર્વથા ॥ ૩૧૦॥

મહેશધ્યાનમમલં દુઃખારણ્યદવાનલઃ ।
સત્યમેતત્પુનઃ સત્યં સત્યમેવ ન સંશયઃ ॥ ૩૧૧॥

મહેશસ્મૃતિમાત્રેણ મહાપાતકકોટયઃ ।
નશ્યન્તિ દુઃખદાઃ સદ્યઃ શલભા ઇવ વહ્નિગાઃ ॥ ૩૧૨॥

મહાપ્રલયકાલે વા ઘોરાયાં વા મહાપદિ ।
ન પ્રાપ્નુવન્તિ દુઃખાનિ શિવાર્ચનપરાઃ સુત ॥ ૩૧૩॥

કર્મણા મનસા વાચા શિવમભ્યર્ચયન્તિ યે ।
તેષાં શુભપ્રદઃ સદ્યઃ પ્રસીદતિ મહેશ્વરઃ ॥ ૩૧૪॥

યમાદપિ ન ભીસ્તેષાં યેષાં ભક્તિર્મહેશ્વરે ।
ભક્તિર્માહેશ્વરી યસ્માત્સર્વસૌભાગ્યદાયિની ॥ ૩૧૫॥

ધન્યાસ્તે કૃતપુણ્યાસ્તે કૃતાર્થાસ્તે સદા પ્રિયે ।
સ્તુવન્તિ પાર્વતીનાથં પૂજયન્તિ ચ સાદરમ્ ॥ ૩૧૬॥

યે પૂજયન્તિ વિધિવત્ કીર્તયન્તિ ચ શઙ્કરમ્ ।
તેષાં હૃદિ મહાદેવઃ શુભદસ્તિષ્ઠતિ ધ્રુવમ્ ॥ ૩૧૭॥

ત્વમપ્યત્યન્તયત્નેન લિઙ્ગમૂર્તિં મહેશ્વરમ્ ।
સર્વદુઃખવિનાશાર્થં પૂજયસ્વ વિધાનતઃ ॥ ૩૧૮॥

કુરુષ્વ મૃણ્મયં લિઙ્ગં તસ્મિન્પૂજય શઙ્કરમ્ ।
તત્ર સમ્પૂજિતઃ શમ્ભુઃ સદ્યસ્તુષ્ટો ભવિષ્યતિ ॥ ૩૧૯॥

સ સન્તુષ્ટો મહાદેવો દદાત્યેવ સુખં સદા ।
અદેયં શિવભક્તાય મહેશાય ન વિદ્યતે ॥ ૩૨૦॥

વિષ્ણુત્વં યો દદૌ વિષ્ણોર્વિષ્ણુનેત્રાર્ચિતઃ શિવઃ ।
સ સર્વદા સુખં તુભ્યં પૂજિતઃ સમ્પ્રયચ્છતિ ॥ ૩૨૧॥

બ્રહ્મણા યોઽર્ચિતઃ સામ્બો બ્રહ્મત્વં બ્રહ્મણે દદૌ ।
સ સર્વદા સુખં તુભ્યં પૂજિતઃ સમ્પ્રયચ્છતિ ॥ ૩૨૨॥

ઇન્દ્રાર્ચિતો ય ઇન્દ્રાય પ્રાદાદિન્દ્રત્વમીશ્વરઃ ।
સ સર્વદા સુખં તુભ્યં પૂજિતઃ સમ્પ્રયચ્છતિ ॥ ૩૨૩॥

ઋષિભિઃ પૂજિતઃ શમ્ભુસ્તેભ્યો મોક્ષં દદૌ શિવઃ ।
સ સર્વદા સુખં તુભ્યં પૂજિતઃ સમ્પ્રયચ્છતિ ॥ ૩૨૪॥

અપારકરુણાસિન્ધુર્જગદાપન્નિવારકઃ ।
ન હરિષ્યતિ કિં શોકં તવ પુત્ર સ શઙ્કરઃ ॥ ૩૨૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મૈનાકપ્રતિ હિમવાન્પ્રોક્તં શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । વાવૃત્તશ્લોકાઃ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. vAvRRittashlokAH..

Notes:
Himavān હિમવાન્ delivers Upadeśa ઉપદેશ to his son Maināka મૈનાક about worshiping Śiva શિવ, especially in form of Mṛlliṅga મૃલ્લિઙ્ગ.

Proofread by Ruma Dewan

*Mainakaprati Himavanproktam Shivarchanopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*